Digitized by Arya Samaj Foundation Chennai and eGangotri

10.2

ईशा

विद्वन्मणिः
डॉ. केशवचन्द्र द्वाशः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

11

1461/3

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान केन्द्र
तिथी.....
पु०सं०.....
भारती पुस्तकालय

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation.Chennai and eGangotri

ईशा

(कवितावली)

विद्वन्मणिः

डॉ० केशवचन्द्रदाशः

प्राप्तिस्थानम्

लोकभाषा-प्रचार-समितिः

शरधाबालि, पुरी-७५२००२

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईशा

(कवितावली)

प्रणेता—
विद्वन्मणिः
डॉ० केशवचन्द्रदाशः
अध्यक्षः, न्यायदर्शनविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः
श्रीविहारः, पुरी-७५२००२

प्रकाशिका—
© श्रीमती सुभद्रादाशः

(भारतसर्वकार-मानवसंसाधनविकास-
मन्त्रालयस्य धनसहायेन प्रकाशिता)

प्रथमसंस्करणम्—
1992

मूल्यम् — २०/-

मुद्रकः—
श्रीनारायणप्रेस्
बालिसाहि, पुरी

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान केन्द्र
तिथी.....
पु०सं०.....
भारती पुस्तकालय
206

नोदेति.... ....

नास्तमेति.... ....

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान केन्द्र
तिथी.....
पु०सं०.....
भारती पुस्तकालय

मनाक् . . . .

मनोगतम् . . . .

जीवनमिह पर्याकुलम्। पाथेयं विकलम्। प्रवृत्तिः नीहारपीड़िता। कर्मधारा विपर्यस्ता। आचारः अहंकारजड़ः। विचारो मोहनिबिडः। अतिक्रमणकलुषितं धावनम्। कलह-विलसितं व्यवधानम्। व्याहृतिः विकृतये। गतिः अपकृतये। कुत्र संगतिः ?

मिलनमनोरथे 'ईशा' इति व्याप्तिमती काचित् साहचर्यलिप्सा। वहनदहनप्रसरे इयमेका तादात्म्यगीतिका। न प्लावने, अपितु पावने निमज्जनमिह यजनम्। हितमतिरत्र कर्त्तव्यस्य पुरोलिपिः। आतिथेयता परिणतरतिः। व्यवधान-विनाशश्च संगतिः। इयं संबध्नाति। इयमपि संसृजति। संबन्धे स्वस्ति। संसर्गे अभिनवनिर्मितिः। इयं संगतेः पावनदशा.... इयमीशा.... .... अत्र परिचयपरिभाषा।

असंगतिषु संगतिरिह काव्यशैली। उपाधयो नाना। परमुपाधेयं समानम्।

विनीतः

केशवचन्द्रः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

SHRI JAGANNATH SANSKRIT VISHVAVIDYALAYA

PROFESSOR G. C. NAYAK
M.A. (ALLD). Ph. D. (BRISTOL)

VICE-CHANCELLOR,
SHRI JAGANNATH SANSKRIT VISHVAVIDYALAYA
SHRI VIHAR, PURI-752002
ORISSA (INDIA).

Phone :
2663 (Off.)
2640 (Res)

Date 28 4. 92

FOREWORD

This is a collection of poems written in Sanskrit by a well-known young poet endowed with a rare combination of talents, poetic as well as scholarly. The collection is as varied as it is attractive, what is striking, however, is that the collection, while leaning towards some sort of existentialist thinking, is having a typically mystical overtone which pervades it throughout. Here I will be concerning myself with an examination of only some of the ideas contained in this collection.

I take it that the poet of this collection expresses himself fundamentally as a seeker. It is well brought out in the image of an age-old traveller in search of a new abode नवनिलयान्वेषणे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रमति पुरातनपान्थः—(ईशा) । The question that is raised by the old woman in his first poem to the young newcomer is कुत आगतः....कुत्र गमिष्यसि ? (where from have you come and where are you going ?) One would be naturally reminded here of Acharya Shankara's famous *Charpaṭa Pañjarikā*, कस्त्वं कोऽहं कुतः आयातः ? and also of Omar Khayaam's *Rubaiyat*, 'Into this universe and why not knowing'. The outcome of the search is some what frustrating, of course. In the words of the poet, आशाबन्धो बन्धुरः केवलः / अद्य त्वत्सत्तासंधानम् / प्रतिभाति साक्षात् पलाण्डुकेशरान्वेषणम् ।

The entire pursuit seems to the poet to be like the search of something elusively substantial inside the onion-skins. Once again one is reminded here of the well-known passage from Omar Khayaam, "Myself when young did eagerly frequent / Doctor and Saint, and heard great argument / About it and About : but ever more / Came out by the same door wherein I went".

The poet's heart seems to be rent asunder by a note of despondency and despair, no doubt, as when he declares 'पुरा यथा तथा ....पुनरपि व्यथा पुनश्च आक्रोशः / पुनरपि क्लेशः / विपर्यासबहुत्वेऽपि, न कोऽपि निर्यासः.... but I would rather construe it as a typically existential awareness of the poet. 'शून्यायते संपर्कस्य मधुपरिभाषा/गतिरत्र केवलबुभुक्षा' says the poet. All relations, howsoever sweet or intimate they may be, come to nought, and end in void, "a tale told by an idiot, full of sound and fury, signifying nothing," in the words of Shakespeare.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

And yet life goes on clinging to itself, as it were. There is an eternal longing for life. Life has to be lived at any cost, you see. 'यथा कथंचित् चिरजिजीविषा or 'इच्छाया: शेषकणे जीवनं तथापि जृम्भते' as the poet gives vent to his feelings in his inimitably attractive style. This is the existentialist element which can not be lost sight of in this collection.

Apart from this, there is also an element of mysticism to be found side by side in this work. The pcet seems to be aware of a presence through and through, regarding which Wordsworth would say, it is "a presence that disturbs me with the joy of elevated thoughts" (*Tintern Abbey*), त्वामहं पश्यामि तथापि चैत्रालीप्रान्तरे.... सन्ततीनां दन्तशून्यहासे... सौभाग्यकुङ्कुमपरागे .. says our poet. The presence is felt in the smile of a baby, in the nuptial mark of a damsel and so on. Here it seems that the poet's unconscious is under the influence of the famous passage of *Abhijñāna-Shākuntalam*— "आलक्ष्यदन्तमुकुलाननिमित्तहासैः" etc. In any case, it is that presence which is acknowledged by the poet in so many forms, in numerous ways. It becomes evident when the poet says— "शिशिरसिक्तघासस्य कपाले त्वमवतरसि" (Ycu descend over the face of the dew-drenched grass) or when he says—तदानीं शृणोमि ते अदृश्यचरणच्छन्दसि शिजिनिनिक्वणम् (I hear music in your invisible fcot-steps) or even when his thoughts find expression in the image of a bank along which life-current flows—तटायसे त्वमेव केवलम्. In the above-mentioned lines, some sorts of mystic influence is there beyond any doubt. In

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

the words of Tagore, "Thou art the sky and thou art the nest as well" (*Gitāñjali*). Again Tagore says at another place, "I know not from what distant time thou art ever coming near to meet me ———— In many a morning and eve thy footsteps have been heard".

Albert Camus thought that "even within the limits of nihilism it is possible to find the means to proceed beyond nihilism" (*The Myth of Sisyphus*). It is interesting to find that the poet who declares on the one hand that all our most loving and sweet relationships end in void also finds himself drawn towards the smile of a baby and the dew-drenched grass by an inevitable force. as it were. This could be just a mystical awareness. On the otherhand, it could as well be that the poet here has, all unawares, laid his "heart open to the benign indifference of the universe" (*The Outsider*), to use the words of Camus again. But even then this is also nothing if not a form of defense mechanism in the garb of mysticism in face of the indifference of the universe to which the poet is exposed and of which he is so deeply aware.

The poet of this collection is also no less aware of the present sad plight of our people, our land, and our culture. The poet in his inimitably lucid style reminds us that 'गृहमिह कुरुक्षेत्रं / कर्मशाला हिंस्रमाला.... / गङ्गानदी न चिरप्रवाहा / मैत्रेयो न महनीया... / सम्मुखे दण्डयमाना भारतीयता न क्रीतदासी इव. According to the poet, the great Indian Culture has been

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

reduced to a slave girl, as it were. We have no other alternative but to go on running in an endless run, so to say, प्रधावनं प्रधावनम्, निरन्तधावनम्. Perhaps at the end the union or the communion may come. After all, there is always hope, for the poet describes himself in the very opening lines of his first poem as मिमिलिषुः आषाढस्य बिन्दुः (A drop of rain awaiting union). 'संगतिकरण' (final harmony or union) is postulated immediately after that as the *Summum bonum*. The poet is hopeful, after all and this longing for union संगति provides an adequate motivating force for him.

These are only some of the points which I have tried to highlight in the work of this young talented poet and all these taken together make the collection uniquely attractive. What is more. the novelty in language of the poet seems to be in perfect consonance here with his penetrating ideas. I hope that this work would receive the attention as well as the appreciation of both the general readers and the learned critics.

Sd/-
(G. C. Nayak)
28. 4. 92

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूची

	विषयाः	पृष्ठम्
१.	ईशा	१-१६
२६.	त्वमवतरसि	१७
२७.	अन्धस्रोतः	१९
२८.	संस्कारः	२०
२९.	अस्पष्टम्	२१
३०.	परदृश्यम्	२२
३१.	झञ्झा	२३
३२.	आबद्धम्	२४
३३.	शिखरमेघः	२५
३४.	रजनी विजनीभवति	२६
३५.	जृम्भापथः	२८
३६.	पदान्तरम्	२९
३७.	नीरवरवः	३१
३८.	वराकपुराणम्	३२
३९.	प्रसङ्गः	३३
४०.	अनन्वयः	३४
४१.	हेतुगर्भः	३५
४२.	कुण्डलम्	३६
४३.	अवशेषः	३७
४४.	बिन्दुवलयः	३८
४५.	व्यवधानम्	३९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

	विषयाः	पृष्ठम्
४६.	उष्मच्छाया	४१
४७.	त्रिधारम्	४२
४८.	विमन्थनम्	४३
४९.	निसज्जस्वाक्षरम्	४४
५०.	प्रवासः	४५
५१.	चिह्नपरिचयः	४६
५२.	प्रथमभूमिका	४७
५३.	विच्छिन्नकिंशुकः	४८
५४.	नाविकः	४९
५५.	रिरंसा	५०
५६	व्यस्तमण्डलम्	५१
५७.	परागः	५२
५८.	संस्कृतिपथिकः	५३
५९.	अनुच्चारितम्	५५
६०.	नयननिदाघः	५७
६१.	अग्रभूः	५८
६२.	अधिवासः	६०
६३.	वचनम्	६१
६४.	अनपायिनी	६२
६५.	त्रिपदी	६३
६६.	पूर्वभूमिः	६४
६७.	शिथिलसमष्टिः	६५
६८.	आविलम्	६७
६९.	व्यक्तिः	६९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

	विषयाः	पृष्ठम्
७०.	पुलकप्रस्थः	७०
७१.	मौनप्रकरणम्	७१
७२.	अभिव्यक्तम्	७२
७३.	संगमः	७३
७४.	यात्रा	७४
७५.	निमग्नः	७५
७६.	सूर्यस्य साहित्यम्	७६
७७.	तटी	७७
७८.	दूरवर्त्ती	७९
७९.	सुरभिसंकेतः	८१
८०.	आषाढलाञ्छनम्	८२
८१.	प्रत्यूषगरलम्	८३
८२.	शब्दस्तु कृपणः	८४
८३.	प्रतिच्छविः	८५
८४.	विद्धः	८६
८५.	अपरपंक्तिः	८७
८६.	परिपाकः	८८
८७.	आनुपूर्वी	८९
८८.	मिश्रलिपिः	९०
८९.	विभक्तवेदी	९१
९०.	अपराह्णमाया	९२
९१.	पादटीका	९३
९२.	अहमिति	९४
९३.	अधिकरणम्	९५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयाः		पृष्ठम्
९४.	सद्गतिः	९६
९५.	वृत्तगीतिः	९७
९६.	अभिनादः	९८
९७.	रोमन्थः	९९
९८.	यजनम्	१००
९९.	द्विप्रहरः	१०१
१००.	साक्षात्कारः	१०३

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूची

	विषयाः	पृष्ठम्
१.	ईशा	१-१६
२६.	त्वमवतरसि	१७
२७.	अन्धस्रोतः	१९
२८.	संस्कारः	२०
२९.	अस्पष्टम्	२१
३०.	परहस्यम्	२२
३१.	झञ्झा	२३
३२.	आबद्धम्	२४
३३.	शिखरमेघः	२५
३४.	रजनी विजनीभवति	२६
३५.	जृम्भापथः	२८
३६.	पदान्तरम्	२९
३७.	नीरवरवः	३१
३८.	वराकपुराणम्	३२
३९.	प्रसङ्गः	३३
४०.	अनन्वयः	३४
४१.	हेतुगर्भः	३५
४२.	कुण्डलम्	३६
४३.	अवशेषः	३७
४४.	बिन्दुवलयः	३८
४५.	व्यवधानम्	३९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

	विषयाः	पृष्ठम्
४६.	उष्मच्छाया	४१
४७.	त्रिधारम्	४२
४८.	विमन्थनम्	४३
४९.	निसज्जस्वाक्षरम्	४४
५०.	प्रवासः	४५
५१.	चिह्नपरिचयः	४६
५२.	प्रथमभूमिका	४७
५३.	विच्छिन्नकिंशुकः	४८
५४.	नाविकः	४९
५५.	रिरंसा	५०
५६	व्यस्तमण्डलम्	५१
५७.	परागः	५२
५८.	संस्कृतिपथिकः	५३
५९.	अनुच्चारितम्	५५
६०.	नयननिदाघः	५७
६१.	अग्रभूः	५८
६२.	अधिवासः	६०
६३.	वचनम्	६१
६४.	अनपायिनी	६२
६५.	त्रिपदी	६३
६६.	पूर्वभूमिः	६४
६७.	शिथिलसमष्टिः	६५
६८.	आविलम्	६७
६९.	व्यक्तिः	६९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

	विषयाः	पृष्ठम्
७०.	पुलकप्रस्थः	७०
७१.	मौनप्रकरणम्	७१
७२.	अभिव्यक्तम्	७२
७३.	संगमः	७३
७४.	यात्रा	७४
७५.	निमग्नः	७५
७६.	सूर्यस्य साहित्यम्	७६
७७.	तटी	७७
७८.	दूरवर्त्ती	७९
७९.	सुरभिसंकेतः	८१
८०.	आषाढलाञ्छनम्	८२
८१.	प्रत्यूषगरलम्	८३
८२.	शब्दस्तु कृपणः	८४
८३.	प्रतिच्छविः	८५
८४.	विद्धः	८६
८५.	अपरपंक्तिः	८७
८६.	परिपाकः	८८
८७.	आनुपूर्वी	८९
८८.	मिश्रलिपिः	९०
८९.	विभक्तवेदी	९१
९०.	अपराह्णमाया	९२
९१.	पादटीका	९३
९२.	अहमिति	९४
९३.	अधिकरणम्	९५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयाः		पृष्ठम्
९४.	सद्गतिः	९६
९५.	वृत्तगीतिः	९७
९६.	अभिनादः	९८
९७.	रोमन्थः	९९
९८.	यजनम्	१००
९९.	द्विप्रहरः	१०१
१००.	साक्षात्कारः	१०३

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईशा

(१)

सागरशय्यात उत्तिष्ठते
आरक्ततपनः
मन्नयनें भरति
नवीनकज्जलम्
कविता संजायते मम
अनुभवलिपिः
फाल्गुनं च जीवनान्तरम् ।
नाऽहं निक्षिप्तकन्दुकः
प्रत्यागमिष्यामि
भूतलं संस्पृश्य,
परमेको मिमिलिषुः
आषाढस्य बिन्दुः ।

(२)

संगतिकरणस्य
शुभ्रमनोरथे
अहमद्य यजे—
आवाहनं मम कदा
न त्वां दोनीकरिष्यति
त्वमेव हि बहुलीभवसि
मङ्गलसूत्रेषु
स्वाहाकृत्य
आत्मनः पीयूषम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३)

मुक्तवातायने मम
अपसरन्ति कति
प्रतीक्षायाः
अस्तचन्द्रवेलाः,
मनोऽनुसरति तथापि
सदैव ते रमणीयच्छायाम्,
जानेनाऽहम्.....
जीवनस्य स्रोतो मम
वहिष्यति
कस्मिन् तटधारे
तथापि वहनमात्रम्
तटायसे
त्वमेव केवलम् ।

(४)

वदन्ति ते—
संदृश्यत उपागमस्तव
कस्मिन्नेकपुष्करिणी तीरे
यदा काचित् अजा कर्णयति
आत्मनो मांसस्य विलापम्,
नीरदस्य अपरागो यदा
दृश्यते पुरस्तात्
तूष्णीशीलपर्वतस्य
कूपीकृतशिखरकोटरे,
यदा च पार्श्वस्थवसतेः
वैदिकप्रभातसमूहो
विदधाति निरीप्सितस्नानं
प्रान्तरस्य शुष्कसरसीषु ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(५)

त्वामहं तु दृष्टवान्
कैशोरे मे .....
दिनान्तानां
वलयित सूचिपत्रे
पल्लवित-तरु-लतालीनाम्
अस्फुटपुष्पेषु ।
पुनश्च मनोज्ञ निशान्तस्य
कुक्कुटस्तवने.....,
विगलन्ति यदा
पर्युषित विकल विभावाः ।

(६)

विहगानां तुहिनितस्वप्नं
संप्रति प्रेङ्खोलयति
विरहोष्णमञ्जुलमयूखः,
कृष्णमेघतले विलुप्यन्ते
पल्लीमहीरूहाः
प्रतिपल्लवमुपश्लेषप्रिया
सायन्तनच्छाया—
बहूदूरमागता मे
मग्नप्राया विपन्ना तरणी
क्षेपणी च तलं न स्पृशति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(७)

सीमन्तिनी सीमन्तरङ्गेषु
बहुशो निमज्य
अहमिह हिमपथयात्रिणाम्
अग्रणी·····
हृदयनिवेदनं
कस्मै···अर्पयामि ?
निधिभवनस्य
अलिन्दे यदा
श्रूयते भौतिकतास्वरः
विक्षिप्तदीनतासु च
चीत्करोति
शैलकल्पक्षुधा—
कमहं श्रावयिष्यामि
प्रसूतिकाव्यथां मम ?
सन्धिसन्धानयोर्मध्ये
दोलायते स्थितिर्मम
रक्ताक्तं च
शिथिलचरणम्
आत्मप्रत्ययस्य
प्रत्यग्रपृष्ठेषु
आशामसी
मृता प्रतीयते ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८)

नवनिलयान्वेषणे
भ्रमति पुरातनपान्थः
माणवको द्रव्यभारवाही
पृच्छति च वृद्धां—
"कुत आगतः..... "
कुत्र गमिष्यसि ?"
प्रश्नहासे विराजते
तस्या लपनश्रीः
साक्षादेका—
घूर्णिवाताहता
विदीर्णा विपणी ।
प्रातः स्नायिनीनाम्
अवगुण्ठनेषु
उपसंहारमन्विष्य
अहमिह कूलंकषः ।
तपन उदित इति
सर्वं व्यशदयन्
परमहं
प्रातनं दृष्टवान् ।

(९)

जलभुक्ततरुवरे
पुष्पिताः छत्रकाः
अपगता.....
शरन्निशिथिनी
दीपशिखा च मुक्तवती

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैलनीमूलम् ।
धेनुलाङ्गुलस्य
मक्षिकापसारिपवनें
वहति संप्रति
अनुपमसान्द्रविजनता,
त्वमेहि रहसि
अलंकुरु मम
(१०) कलङ्कितान्तरम् ।
वकुलच्छायातले यदा
शिथिलचेलाञ्चलं
पताकायते,
चर्वणमभ्यस्यति
मेषशिशुरपि,
उपनदबालुकासु
श्रूयते च
वत्सपरित्यक्तगवाम्
उद्ग्रीवध्वनयः
तदानीं शृणोमि ते
अदृश्यचरणच्छन्दसि
शिञ्जिनिनिक्वणम्,
ध्वनिरर्थायते—
गोबद्धकीलकमिव
पीठायते व्यथा ।
विप्लवियायावर इव
अपथयात्रिण
आत्मग्लानिं
चिनोमि केवलम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(११)

प्रतिदिनमवलोकयामि
नवमुखमिह –
न लभे कस्मादपि
नूतनसन्देशम्,
दर्पणे तु रूपमिह
विपरिणमते,
आविष्कारे विभासते
ममान्तः क्षयिष्णुसागरः।
सम्मुखे मे—
निमग्नः तथापि
अन्तःसारशून्यः
कश्चिद् यायावरः
जरद्रुष्ट्रचरणतः
कण्टकखनने।

(१२)

अब्दानां नीहारझरोषु
मीनसंतितीर्षा मम
तथापि वसन्ततिलका,
परं गोपुच्छस्य
अदूरसंचारो यथा
परिबद्धा क्लान्तपरिक्रमा
अमृतप्रतीक्षया
अत्राऽहं समयस्य
गरलं पिबामि
शिशुर्यथा अङ्गुलीं पिबति
न विज्ञाय
हानिं वा लाभं वा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

 Digitized by Arya Samaj Foundation Chennai and eGangotri

(१३)

अद्यापि मानसमायाति
पल्वलपयसि ते
सांध्यप्रतिरूपम्...
ज्योत्स्ना धौतरजनीनाम्
उपकण्ठम् ।
प्रभातवायसस्य
वृथाजागरणम्,
पुनरवसादं विकीरति
बाल्यकाले परिहितो
धौतरङ्गः कश्चित्
जीर्णपरिच्छदः—
हासस्य वा अवकाशः कुत्र ?
जटिललतिकायाः
प्रवृत्तिमाहृत्य
यत्र तत्र चरणस्य
बलयीकरणं यदि
जीवने सर्वस्वम् ।

(१४)

विविक्त मनीषातले
विजृम्भते
पूर्वपरकर्मराशेः
काचिद् गुप्तरतिः,
अहमिकया सह
हृदयं स्पर्धते
अग्निवृष्टिः भवति रहसि
मनश्च पिबति

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्थनस्य विषम्
अतोऽहं श्रद्धाविधुरः
कश्चित् प्रकृतिपांसुलः,
स्नुहीमूले गोविकर्षो यथा
प्रवृत्तिर्मे—
सरीसृपायते ।

(१५)

तथापि श्रुतो मया
सरितां सङ्गमसंलापः
अत्रैव चक्रवालतले
दृष्टा मया
तमस्विनी रतिः
परमिह—
संगतेः प्रार्थनापत्रं मे
खादितं वल्मीकैः ।
अद्य त्वत्सत्तासंधानम्
प्रतिभाति साक्षात्
पलाण्डुकेशराम्वेषणम् ।

(१६)

विगलिष्यन्ति आगामिनः
कोटिशो वासराः
परिपर्त्तिष्यते—
अवस्था पारिपार्श्विकी
वेपथुनिविडस्नायुषु
तथापि स्थूली भवति
अद्य....अद्य....अद्य....इति

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आवृत्तनिर्घोषः ।
जलनीली इव
कमपि त्यक्तुं
नेच्छति मोहिनी
वर्त्तमानस्य सरणिः ।

(१७)

अवधूयः.....
अदृश्यावरणं
नक्षत्राणि प्रथयन्ति
शिशुवेदं यदा
तदैव मातरमातुरीकरोति
क्षुधातुरविहगशावकः
अर्धं ददाति यदा सा
संभुक्त भोजनात्
चक्रवाको विलपति
अबलोक्य
पौषपौर्णमासीं
प्रतिस्वनयति
वातवती गुहा ।
स्वकायकस्तूरीसंधाने
व्यतीयते मम
पीडाक्लिष्टनिरन्न
निशीथम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१८)

त्वामहं पश्यामि तथापि
चैत्रालीप्रान्तरे ...
सन्ततीनां
दन्तशून्यहासे....
सौभाग्यकुङ्कुमपरागे....
अलसमरालस्य
चरणचिह्नेषु.....
अव्यक्तं स्नपयति यदा
किञ्चिदनुपाख्यमिह ।

(१९)

प्रातरभूदिति
अनुभूयते सुशीतलः
ग्रीवाहेमहारः,
शय्योपरि सर्पायते
विमुक्तमेखला,
छिन्नं सन्नलभ्यते
गुल्फविभूषणम्,
सरसोपुलिनें—
चरणघर्षणपाषाणे च
विलोक्यते अलक्तकचिह्नम्,
उपलब्धिविशेषे तथापि
न प्रकाशः प्रकाशते
पिहितद्वारे हि मे
अहंकारः प्रतिबंधायते ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२०)

गता ये—
न पुनरागता,
तथापि ड़यते वियति
पुरातनविहङ्गमः कश्चित्
मुखे धृत्वा
लघुयष्टिमेकाम्....
शान्तये च व्याहरति
"सुखा नो विश्वा
सुपथानि सन्तु"—
परमिह कूलवधूकलसीषु
प्रज्वलनं जलायते,
गजपुरीषकपित्थमिव
शून्यायते
संपर्कस्य मधुपरिभाषा
गतिरत्र केवलबुभुक्षा...
यथा कथंचित्
चिरजिजीविषा....

(२१)

सम्मुखे प्रतिभाति
स एव प्रदेशः
यत्र न मृत्युरासीत्
अमृतं न तर्हि—"
परमहं विलपामि
कुक्कुराणां मृगयाव्यूहे
यथा काचित्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरव्या कुक्कुटी.... ।
प्रतिपदं स्खलति चरणम् ।
आरोहणविचारोऽत्र वृथा
सोपानेषु पुरतो हि
नीली समुत्थिता ।

(२२)

अल्पदूरे.....
पार्वत्यवनेषु
समाप्यते.....
नीलोज्वलस्वर्गः
आकाशो वेपथुमान्
करका हुंकारे
संगणकगणनायां
वृष्टिर्वह्नीयति
भेकीकण्ठे
मृता विहगी रोदिति
शान्तिः....शान्तिः....शान्तिः ।

(२३)

अहमद्य पर्याकुलः
कश्चिद् हताशो वृषभः
यथेच्छं विहरामि
स्वपिमि च
वृक्षमूले कस्मिन् ।
मनोविपिने मे
अपकृतिः कुसुमायते,
परं मुखे मधुकथा
पुष्पपार्श्वे यथा कीटकृतज्ञता ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२४)

इदानीं जीवनधारा मे
प्रतिभाति गलितोपला
यथैका विवर्णमुद्रिका
चन्द्रतारकयोः दूरतायां
संगतिः साक्षान्नीहारिका ।
तथापि, अनिद्रनयने
पर्णस्य पिपासा
मनो विमुक्तं मे—
आत्मनि विहरामि
"शान्तं सत्यं किमपि परमं
ज्योतिरन्तः स्मरामि" ।

(२५)

गतास्ते दिवसाः
नगरगह्वरे सूर्यो द्रुतविलम्बितः
न श्रेयसे, न वा नवीयसे
केवलमवलये हासो विलुलितः
अधरे.... विधुरे....
अदिनस्य धारे धारे
दूरोदरपयोधरे
अनुदारे... निरादरे....
वेदवाददूरे.... दूरे
गतास्ते वासराः.....,
पस्पारे....
प्रचुरप्रचारे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिवारें....परिवारें....
नामरूपरहस्ये विहस्य ।
पुनश्च आक्रोशः
पुनरपि क्लेशः
विपर्यासबहुत्वेऽपि
न कोऽपि निर्यासः,
अविश्वासे सवमसदृशम्
नववर्षे नवहर्षम्
न पुनः तादृशम्
पुरा यथा तथा
पुनरपि व्यथा—
ततोऽपि अविश्वस्तः
अस्तव्यस्तो मनुष्यसमस्तः
सन्ध्याकालबन्ध्यायाः क्रन्दनें
आशाबन्धो बन्धुरः केवलः ।
पुनरपि वासरो धूसरः
भोगभागे विभागे विभागे
युगे युगे.... अभियोगे
विधिश्च वधिरः.... ।
पुनर्विना विना
नवीना भावना
वन इव निवसनम्
विवसनं जीवेषु व्यसनम्—
अहमिति....इति
मम....ममेति....ममेति
इतिकारपरिसरे

CC-0 Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमिति....किमिति
विस्मयविषय इति न भवति ।
कालः कलायते —सरले....तरले....
अविरले विरली विधातुम्
मरालीनयनें परन्तु
'ईशा' भाषामाहरति
हरति....विहरति
रतिरेखां रेखयितुं
शाखयितुं सखीभावें
मुखे....मुखे....
पुनर्दिवामुखे... .... ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वमवतरसि

आकाशे छायामाला
तले मेघप्रस्थानस्य
स्नेहाङ्कितलिपिः
बुभुक्षूणां माहायात्रा
पूरयति मध्यव्यवधानं
मार्गपार्श्वे दरिद्राति प्रकाशप्रकृतिः।
परिवर्त्तयति सीमारेखा देहम्
घूर्णनं न त्यजति परिधिं
संकुचितशिखरे वृक्षस्य
विधूयते वसुन्धरालाक्षा
अव्यक्तस्य कज्जलधारायाम्
अदृश्यं लोतकायते।

शिशिरसिक्तघासस्य कपाले
त्वमवतरसि... ....
कस्मिन्नेक-शवस्य सम्मानें
बुद्बुदस्य उपमाने....अभिमानें
कालो दोलायते
वैराग्यस्य हलाहले...कोलाहले
विषयस्य आग्नेयहिल्लोले
आन्दोलनकाले.....विकले
अन्धभिक्षुमनुसरत्खञ्जकुक्कुरस्य
उल्ललितलाले....
त्वमवतरसि पुनः
तन्द्रालुबालकस्य
जृम्भालुकपोले।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वमेव बिन्दुरसि....तदेव वितरसि
रसेऽवतरसि....पुनरभिनये....अनुनये
स्वप्नविनिमये
चतुरचकोरस्य तृषार्त्तनिर्णये.... ।
परमपचीयते परिचयो मम
अभिलाषगायत्रीनिवहे
निजसात्करणस्य आकस्मिकमोहे
निःसङ्गविहारस्य प्रसंगप्रवाहे
विरहिविभावो भवनायते
वनायते....घनायते....
सनातनायते..... ॥

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्धस्रोतः

मार्गान् विगिलति
अन्धस्रोतः.....
नामृतं मृतं वा दृश्यते
निमन्त्रणच्छलेन समुपैति
म्लानकुसुमसुरभिः,
श्रूयते केवलम्....
ममूर्षुकुन्थनम्
अन्तःसत्त्वाया अरुचिरिव
अलङ्कारायते...
आर्त्तनादः.....
विभक्तव्यक्तित्वे—
विभाजक भूगोलं च
प्रकृतिविकलम् ।
चिन्ता कान्तायते—
कोलाहले बुद्बुदस्य
रङ्गो विवर्धते
शब्दो वह्निमान् भवति
दृश्यं शोणायितुं
तथापि न विमुञ्चति
अवरोधमन्धस्रोतः
अदृश्यमरुणायितु
नात्मदीपे ज्योतिर्ज्योत्स्नायते ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कारः

त्वामहं चिनोमि
अतीतस्य मधुरकल्पतः
उच्छिष्टं शोधयितुं सद्यः
तिरोभवति मनागुपद्रवः
नगरस्य रविवासरीयमार्ग इव
शान्तायते मनः,
तृषा तु न शाम्यति
पुरातनस्फुलिङ्गस्य.... ।

मेघो वियुज्यते आकाशशरीरात्
अरण्यं स्खलति पर्वतविवरात्
नदी प्रतिष्ठते प्रणालकवलात्
मार्गोऽपि ह्रियते प्रान्तरपिञ्जरात्
तथाप्यनुभवे तापो न तुष्यति ।
अपसृताः ऋतवो बहवः,
पलाशस्य अलसविकासे
कियान्न कातरोऽहम्
हृदयस्य शीतलकवचे
क्षालयितुं त्वामिह केवलम्
इदानीमपि नव्येन....हव्येन ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्पष्टम्

निजबीजाधिगमे रतिमान्
यथात्मानं मूलयति द्रुमः
गभीरतमं तथा शब्दः प्रणवायते
मम सम्बोधने.... .... ।
उपकूलस्य शिल्पतल्पे
लहरीणां रतिलेखा यथा
स्मृतिस्तु परिधूसरा
अनुभवं परामृश्य
अतीतविन्दुतः..... ।
सीमा समायते संसारिस्थायित्वे
कुण्ठितप्रियाया
निशान्तवसनमिव
अस्पष्टमभिहन्ति मेघो दोलायते
वायसस्य विखण्ड़ितरावः,
प्रतिमुखं शब्दस्तु स एव
समानोऽपि कियान्न पृथक्
प्रतिस्तरमर्थः ?
स्पष्टी भवति तापः
कर्कटस्य पृष्ठे....जलधारें....
छाया निवर्त्तते
गगनवितानम्
भूतभव्यप्रस्रवणे
स्थिरगर्भः....
तथापि प्रवाहः ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परदृश्यम्

अभिलाषो मम
मरुशय्यायां कश्चित्
निमग्न उत्तापः
अथवा मेघः साक्षात्
आकाशस्य वेपथुस्फीतिमा
अत्र तु ऊर्जस्वलः
दहनस्य शुद्धस्वरः .....
उदेतु तपनः किं वा सौदामिनी
विशिष्यत इह जीवनदावाग्निः ।
वाहयितुं सर्वान्नपि
तत्पथपथिकान्

मन्दायते लोकयानं यथा
तथा समाख्याति यायावरः
सुखस्वप्नराशिः
दुःखस्य संकेतवहन् ।
सम्बोधनस्य दीर्घस्वरे मम
प्रतिध्वनिं रचयति
प्रस्थानस्य चित्रकाला काचित्
परदृश्ये चन्द्रः पुष्पायते
लताया अञ्चले
परिचयप्रयोजनतले
पुरातनतर्पणं पिबति
नूतनसरसी... ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

झञ्झा

धान्यपर्णे स्पन्दघूर्णिः
लोलयति शरदुद्वेलनम्
दिशा प्रतीक्षते यथा
करताले असन्तुष्टा
प्रशंसार्थम्....
आतुरा नर्त्तकी।
सीमास्वरूपयोर्वैधव्यलोतके
झञ्झा प्रवहति—
बलिरेखाविनिश्चितमिव
सोपानं तरङ्गायते....
बाह्यविलोकने उपशमः कुतः ?
मनो मुमूर्षते
दुःखं भारायते....
वाष्पावनतमुखे यथा
विलापो गम्भीरः।
काव्यमुन्मोच्यते—
इदं तु तत् काव्यम्
यावत् पठ्यते
तावत् प्रलम्ब्यते
न पठनं समाप्यते
न वा काव्यम् अवसानमेति।
आकाशे झञ्झा निर्लीयते
झञ्झायां तु आकाशः
अव्यक्तः.....।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आबद्धम्

एकीकरोति पर्णानि पवनः
उड्डयति पृथक् च करोति
इच्छायाः शेषकणे
जीवनं तथापि जृम्भते
प्रत्ययस्य प्रतिपदं यथा
सन्देहो रेणुं वितनुते,
भिक्षुः वर्णयति द्वारे
दीनताया विदीर्णनेपथ्यम्
प्रिया निवर्त्तते पुनः
भिक्षापात्रे अभावं समर्प्य
नम्रमधुरस्मिततले
कज्जलमश्रु क्षालयति वेदना विगलति
अधरकोणे स्तूपायते दूरगह्वरतः
ज्वालाया गरलम्
शङ्कां सूचीं विमृशति
चिबुककम्पनें....
दुग्धायते विलापो वक्षसि
कथा निमज्जति केवलस्पन्दनें
कुज्झटिक निर्झरे पुरतः
मीनायते पराजयच्छाया ।
शिखाधारे कीटभ्रमिरिव
स्थितिः रीतिमयी
दीर्घश्वासस्तवके तु
म्लानकलिकाया न शुद्धिः
न वा परिवृद्धिः.... ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिखरमेघः

चेलाञ्चलतन्तुराशिरिव
स्मृतिर्जालायते
विकलविश्वासे
सैव च मन्दिरायते
वयसः श्मशाने
इतिहासायते
पुनरवशेषे— ।
पर्वतशिखरमेघ इव
स्वार्थशिखायां
तथापि संलग्नः
अप्राप्तेः ···· ···· ···
विषादप्रसंगः ।
जीवनस्य संज्ञानुसंधाने
विगलति—
केवलं जीवनम्
स्मितस्य वक्रतायां स्खलति
समयवलयः
अलक्ष्यदीर्घश्वासे मम
त्वमेव प्रतीयसे
साक्षाद् बालविद्यालयः

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजनी विजनीभवति

रजनी विजनीभवति
एकाकिनी गृहिणीव
हेमन्तस्य शिशिरबिन्दवे—
तारका करकायते
व्यथा कथामारभते
अवितथं प्रथयितुम्
यथा कथंचित्
समाप्तिसोपाने—
रेलस्थाने .....
जनसम्मर्दस्य उत्थाने ... पतने

अवमाने ....अभिमाने ....
चलच्चित्रदर्शकप्रस्थाने
रजनी विजनीभवति—
दरिद्रस्य तामसलपने।
दिने .... दिने ....
ऋणस्य व्यादाने
उदरप्रधाने
श्रमिकस्य अभिधाने
रजनी विजनीभवति
कर्षकस्य आषाढीयधान्ये
अशने ....वसने ....पुनश्च व्यसने।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजनी विजनीभवति
देवदासी इव
पथिकसदने
पाने....पाने....प्रतिपाने....
त्रिकालस्य पुलकमापने—
निजनिमज्जने....सैव प्रतिभाति
यथा काचित् प्रतिकृतिः
प्राचीनसंस्कृतेरुच्छिष्टप्रतीतिः
व्यवधानेऽनवधाने
मौनविबोधने
आसाधूनामरण्यरोदने..... ।
प्रवासिनी जननीव
रजनी विजनीभवति
विमन्थने....रोमन्थने....
वधिरक्रन्दने....
अन्धनिवेदने....
रजनी विजनीभवति पुनश्च
प्रहरस्य शीतोष्णस्पन्दने ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जृम्भापथः

परिधानपरिशोषकृते
समुद्दिष्टतारो मार्गायते
वृष्टिकाले—
बिन्दुस्तत्र प्रसरति
पुनरेकस्तमनुसरति
अपसृतगन्तव्ये तु
रहस्यं तनुते
चलनस्य दृश्यम्
दिदृक्षुचिन्तायां यथा
कुसुमविकसनस्य
सीमासामरस्यम् ।
जृम्भाया व्यादाने

बहूनि तु व्यतीतानि
क्षणानां व्यवकलनानि
कुत्र वा संक्षिप्तः कालः ?
उपरतं क्व वा
तदीय स्पन्दनम्.... ?
जृम्भापथे किं वा
केनोपपादितं
जीवनस्य चिह्नम् ?
परिभ्रष्टहस्ताक्षरे मम
त्वमेव व्याप्नोषि केवलं
प्रश्नपत्रे ....
शून्यस्थानमिव.... ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदान्तरम्

मनाक् प्रतीक्षस्व, हे तपन !
यावदहं गृहं मे प्राप्नुयाम्
मनाक् स्पष्टीभव, हे पर्वत !
तमसा ग्रसते.....
हे नदीबालुके !
पाण्डुरा भव कियत्कालम्
उन्मुक्तनयनें हि मे
दृश्यं न भासते ।
को वाऽस्ति सदनें ?
यदि प्रियः स्यात्
नूनं पथि स प्रतीक्षितः स्यात्,
यदि वा प्रिया स्यात्
हृन्मुक्तं हास्यं तस्याः
श्रोतव्यमभविष्यत्
यदि पिता स्यात्

स्नेहस्वरे तस्य गम्भीरता
नूनं बहिरागमिष्यत्,
यदि वा माता स्यात्
तर्हि तस्याः कुशलपृच्छा
ललितनयनें जलमभरिष्यत्,
यदि पुत्रादयः स्युः
तर्हि तेषामात्मीयसम्बोधने

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुलके च लोमशोऽभविष्यम् ।
परं न स्वरः श्रूयते कस्यापि
चतुर्पार्श्वे अहमेव अहं शब्दमयः,
पदे पदान्ते पदान्तरेऽपि च
तमसा ग्रसते....
मनागालम्बस्व, हे पादप !
यावदहं गृहं मे
प्राप्नुयाम् ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीरवरवः

कथा न कदा अलमर्था
तथापि मनसि व्यथा....
शिथिलेन्द्रियेषु
व्यापारविहीना
मलीना कुलीना
शतकल्पजीवनकल्पना
आशा हि समस्यायते
अमावास्या इव।
राकेशस्तु भवति मूकेशः
यथा कश्चित् जरत्केशः
केशवती किशोरी चक्षुषि।
एवं चैतन्यं परिच्छिन्नं
जीवपरिधितः
प्रचारचरित्रे व्यवच्छिन्नं यथा
जिजीविषाचिह्नम्
ततो भिन्नं मिलनपुलिनं
दृष्टिशेषे—
दिशा लेशायते कृशायते—
अधिष्ठाने मनः।
वासनाराशिषु
मासा मसीयन्ति....,
नवौषसः प्राचीनवचसि
सत्यं पिहितं भवति
हिताय....
आत्मीयरहसि।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वराकपुराणम्

अन्तःसत्त्वाया उदरपरिधौ
पृथिवी आकृतिं मिमीते
भावोऽत्र व्याकुलता नाम
अभिप्रायः.....
गर्भवत्या निशि विकलता,
विवृतिस्तु परार्थघातिनी
कृतिः समस्यापातिनी
समाधानविधानेषु
विद्योतते विद्युत्
ततो बज्रं निपतति
वराकस्य आकारमन्विष्य ।

रोग आगच्छति
सातपमेघ इव
परमनुतापो विनश्यति
शिशशिक्षायां यथा
शासनमर्यादा.... ।
तथापि वराकः कारुणिकः
श्रोतुं न किमपि,
गोमयेन उपलिप्य
तदेव पुरातनगृहम्
अनिलमपि नीलीकर्तुं
यतते तथापि
रञ्जयन् व्यजनीं पुनश्च ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसङ्गः

समयस्य जयं रटन्
इहातिथिरागच्छति
द्वारे नृत्यति, गायति
आतिथ्यभिक्षायां तदनु
विस्मरति निजस्वरम्
अतीतं स्मरन्
रोगी संजायते
भविष्यच्च कल्पयन्
विमूढो भवति
भोगसमारोहमभिलषन्
आत्मानमवरोहयति

अलक्ष्ये विलक्षणदृशा
पलितपुलकं तस्य
विलोकनमवनमयति
कृतिमृत्तिकयोः—
व्यवधानं कलयितुम् ।
तथापि चिन्तनं भारायते
दूरतामापनम् ....
प्रसङ्गं च रञ्जयति प्रश्नः
कुत्र समापनम्.... ?
पुनरितः कुत्र वा गमनम् ?

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनन्वयः

शरदिन्दुसुन्दरप्रियम्
शून्यमिह रमणीयम्
अमूर्त्तोऽहं शून्यमूर्त्तिः
स्वाभावस्य समन्वयः
अनन्वये ....
कतिधर्मसमुच्चयः ....
तरीहततरङ्गवत्
मयि तद्.... ....
इतरद्.... इतरद्.... ।

तदिदं सदसत्
जालवत्.... जलवत्
तदिदं संपत्
तरीवत्.... तरङ्गवत्....
नामवत्.... धामवत्....
गगने घनवत् ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेतुगर्भः

वर्त्तुलनक्षत्रराशितः
तमः प्रभवति
अज्ञानमिव शिशुनयनतः
कदम्बपुलकस्य स्मृतितले
नाभिनादं शोधयितुं
प्रातः निवर्त्तते
तटिनीतटवसनेषु
धारायते सरः—
तटोपले....

शैवालस्य चापल्यमिव
उपलानि फलानि धरन्ति।
निरपेक्षनीरे
समाप्तिः प्रत्यभिज्ञायते
वस्तुनो विवरे।
दर्दुरस्य बुद्बुदविमर्शे
तथापि हेतुगर्भः स्वरः
साक्षी साक्षात् शून्यंभरिः
कायाकारे स्वयं चिदाकारः

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुण्डलम्

चिराचरितपथे गतोऽहम्....
प्रमाणपुरतः
स्वादभेदः पुरातनोऽभवत् ।
व्यवधाने संकेतो निर्लीनः—
उद्यानेऽद्य कुसुमप्ररोहः
न पुनरुत्सवप्रियः
सुखसरणिः ह्रसते
दिनगणनायां—
परमाणुः तूणीरे तरति ।

तथापि ऋतुस्पर्शे
बहुवर्णा पर्णलेखा
उज्ज्वलजलकल्लोले च
त्वमिह सहस्रायसे—
अहं च दोलायमानः
कुण्डलमिव
ससीमश्रवणे ।
मयि केवलायते लाञ्छनचयम्
स्वच्छाञ्चले
कामिनीमुखप्रोञ्छितमिव

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवशेषः

एकाकिगमनेऽपि
मार्गः साक्षात्
वकस्य वक्रग्रीवाबन्धः
रोचेत वा न रोचेत
दुःखसमुच्चयमिह
नेपथ्यभाषितम्
व्याकुलनयने
अस्तरागः
चिराय स्वस्तिकम् ।
आलिङ्गने
न स्पर्शो विद्यते
न वा भुजबन्धे
परिधिरुदधीयति,
अन्धीभवति निजगन्धे
सन्धिप्रियं
सर्वानुसन्धानम् ।
रोगरङ्गे निर्वाप्यते
संगमस्य होमः
केदारायते
केवलो निःश्वासः ।
परितः .... पुरतः
संपर्कस्य प्रतियोगी यथा
त्वमवशेषायसे
व्यवधानसर्वस्वलपने ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

बिन्दुवलयः

वृष्टिबिन्दोः
चक्रायितमिव
संपर्कं तरङ्गयन्
छायाकलापतले
तपन उदेति
अस्ताचले
प्रियायाः कपोले
वसनाञ्चले
व्यथा एकार्थीभवति ।
पुनश्च मण्डलाभासः
दूरस्थपादपे
द्वीपे....अन्तरीपे....

कूपीकृतव्रणस्य समीपे
सेचनस्य अभिघाते
उत्खोदितमिव..... ।
संसारोऽयं पुरःसरः
पश्यतोहरः—
अहं तु वृत्तधारे
मण्डलमयः.... बिन्दुवलयः
चलज्जलदस्य ज्वरतो
नीरवतां समालिंग्य
अहमेकाक्षरः
निजभरो विजनेश्वरः

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवधानम्

जीविकाया अस्थायिस्वीकृतिः
अस्थायिगृहस्य ऋणपरिशोधः
दिनमदिनयति, श्रावणि... रे !
तव मम व्यवधानमधिकं भवति
संध्यादीपे स्फुटति ते वेदनायाः छाया ।
श्रावणि रे.... ! पिपीलिकाः चर्वन्ति चरणम्
स्थातुं स्थानमिह कुत्र ?
अद्यापि सरणिमतिशेते सर्वदा मार्जारी
शनिश्च मां भ्रमयति देशे देशान्तरे
श्रावणि रे.... ! तीर्थमयं भवति मुहूर्त्तम् ।
रजनी आयाति, श्रावणि.... रे.... !
काले काले इथ हि सभ्यता—
अमापूर्णिमा निर्झरन्ति एकस्मिन् शयने
निजोत्तापं न जानाति कल्पतरुः
मकरो गिलति सर्वम्
ततो वमति रत्नानि
पलातकचिह्नेषु संस्कृतिः प्राचीना भवति ।
पितामह आर्द्रयति बाल्यवसनं ते
नयनवारिभिः, श्रावणि.... रे !
जीवनस्य व्यापकता नास्ति
यदि वा जीवनस्य मूल्यं स्यात्
निधिभवने न्यासीकृत्य तदेकदा
अहं चिराय जीवेयम्
मद्वंशजा दुःखं न लभेरन् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमवगमयामि, श्रावणि.... रे .. !
यदि वृक्षे न सन्ति विहगाः
पादपोऽयं श्रीहीनो भवति—
अद्य गङ्गानदी न चिरप्रवहा
मैत्रेयी न महनीया
शन्नोदेवीजघनें च
तिलचिह्नमस्पष्टीभवति
श्रावणि.... रे ! सम्मुखे दण्डायमाना
भारतीयता नः क्रीतदासी इव ।
पर्णं तत् झरितम्
गृहमिह कुरुक्षेत्रम्
कर्मशाला हिंस्रमाला
अहं च निष्पक्षजटायुः
अवगाह्य रक्तमांसे तव
निजकृते नीरव उद्धवः ।
नयनं न मुद्रितं श्रावणि रे !
अङ्गुलोनामन्तराले तथापि पश्यामि
व्यवधानं यावन्न विगतम्
तावत्कालपर्यन्तं केवलम्
प्रधावनं.... प्रधावनम्
निरन्तधावनम्..... ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्मच्छाया

दीपशिखाचुम्बनरागे
समरसाऽभवत्
तुलसीच्छाया
ग्रामसन्धिदिग्वलये
मन्द्राऽभवत्
मार्गशीर्षस्य चन्द्रिका
केदारप्रिया.....
दरदलितमुकुले
विषयीकृतवती निशा
विवसनशयनम्....
क्षितिश्च विक्षता
नखविलेखनैः
वसनमुद्दीनं पवनं विना ।
तथापि आयाति छाया
मुखमनसोर्व्यवधाने
सौन्दर्यस्य अवरोहे
त्वमपहीयसे
सोपाने.... सोपाने....
निपानस्य निजच्छाया इव ।
अहं तु स्रोतोवहः
अहरहः.....
छायाया उष्मतामाहर्त्तुं
आत्मनः स्नेहप्रकरणे ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिधारम्

समरस्य सहस्रारे
तृतीयनयनोपरि
उदेति चन्द्रमाः
कुमुदिनी प्रस्फुटति तदा
तुषारसारे.....
तरलधारे....
त्रिधारे
मिथ्या भवति भूषणम्
सत्यस्य शरीरे... ।

विषादं विशदीकृत्य
पुनर्निशा विलिप्यते
सागरचर्मणि—
किन्तु स्वरूपे लहरीस्वरः
परोऽपरः—
जायते.... लीयते....
जलमित्यभिधीयते
विनायते.... नानायते...
अधिष्ठानायते—

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विमन्थनम्

यायावरी चूल्लिका पचति
भिक्षुकस्य अन्नम्....
तथापि नवीनमार्गे
लोतकं प्रत्यावर्त्तयति चक्षुः
अन्तरा.... अन्तरा....
कान्तारसमीरणस्पर्शे।
न जाने किमर्थं मे
अभिसारे....
मनो विमथ्नाति
बहुभुक्ताऽपि वेश्या
किमर्थं पार्थिवगन्धः
अन्धः पदे पदे
पुलकं विस्फुरयन्
जरद्ग्रीवाबन्धे
कथं वा न दृश्यते
प्रतिश्रुतपथः ?
ललितस्मितस्फुरणायां तु
त्वमेव साक्षात्
सौन्दर्यस्य निह्नुतिकेलिः
स्थानापन्ना—
तरङ्गप्रसन्ना
यथा काचित्
प्रतिफलनरचना....,
कामनायां कमनीयायसे।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निसज्जस्वाक्षरम्

अर्पितस्तवके
दूरायते—
यौवनस्य प्रथमवेपथु.
झञ्झायते कुज्झटिका
अस्तरागे.....
परिहारो गम्भीरायते ।
अनुतापे वस्तुनिष्क्रमणं
स्वाक्षरं क्रीणाति,

विनष्टस्य अन्वेषणे पुनः
प्रमाणानि चिन्वन्ति स्मृतयः
मञ्जूषायां यत्नेन संचेतुं
श्रमशेषे.....
उपलब्धिस्तु
निसज्जस्वाक्षरस्य
वर्णमालामात्रम् ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवासः

कल्पवटः त्यजति पर्णानि
अनपेक्ष्य तेषामभिलाषं
वृक्षाद् विभजते खगः
प्रभञ्जनं पिबति रुधिरं
वन्यायाः स्तनतः
जालायते निर्मूललतिका
प्रवासेऽस्मिन् कुतः प्रसन्नता ?
सम्भाव्यपथे हि वार्त्ता आर्त्तायते
यथा काचिद् भग्नशिला
अलिन्दस्य द्वारे—
अहं तु ज्योतिर्दीपयामि
त्वदीयस्मितसंकलनें
दाहापनयनें....
घटना स्खलति नीरववहने
अपवाद उपहारायते ।
अक्षराणि विलुप्यन्ते पृष्ठस्य विलोमे
लिखनं च समाप्यते दीपनिर्वापने
तथापि न निवर्त्तते
लिपिकलपनं मम
प्रात्यहिकनिष्पत्तिस्तूपतः
चरमस्य समस्तरं विस्तारयन्
अहं पुनर्वृद्धो भवामि
शीतरात्रेरुपान्तप्रहरे
प्रविशति प्रतिबिम्बं मम
भग्नदर्पणस्य रेखिकक्कुहरे ।

———

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिह्नपरिचयः

जीवनसंग्रामस्य
स्मरणीयशिविरेषु
अद्यापि अन्धकारः
कोणमन्विष्यति।
कालस्तु स्खलति आकाशवक्षसि
न चिह्नं न वा वर्णं वहन्
नक्षत्राणि प्रमाणं कुर्वन्ति
"त्वमस्मिन् पथि प्रतिष्ठसे
वृष्टिरिव.....
कतिपयशब्देन सह आलोकस्य
कियत् क्षणाङ्कने"—

त्वदीयचिह्नपरिचये
बालुका सहस्रायते
किं वा संग्रहं करिष्ये ?
कियद् वा परिहरिष्यामि ?
स्पर्शमात्रम् अजस्रबालुका
न्यासीभवन्ति वर्धयितुं
भूमाभावं मयि—
परं वृष्टिः कष्टायते
मद्दृष्टिपुरतः
सृष्टये च विसृष्टये
अहं तु तथापि निमग्नः
उभयस्य संलग्नविभवे।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमभूमिका

अभिप्रायस्य कुटिलावर्त्ते
शरत् त्रिशङ्कुर्भवति....
क्षुधातले प्रतिष्ठते
इच्छायाः पृथिवी।
ह्यस्तनस्य पूर्णप्राणा
श्वस्तनकामना क्षीणा....
मृत्तिकाया महागर्भे महाभारनाम्ना
निर्वाणमाप्नोति
वनस्पतेः गुरुत्वप्रार्थना।
संपर्कवलये.... इह तु
वहनस्य दीक्षा—
फेनानि वहति तरङ्गः
विहगान् वहति पादपः अरण्यं वहति पर्वतः
परस्परदूरतायां
सैव क्षुधाया भूमिका
यन्त्रणाया विश्वरूपे
कुतो यवनिका.... ?
न वृक्षो वृक्षं प्रश्रयते पतनसमये....
न वा तारकायाः लपनं म्लायति
पार्श्ववासिनीनां सहसा स्खलने
लीलाचित्रे दृश्यते तु
आत्मनो मुखश्रीः
बिन्दुपुञ्जचरितमन्विष्य
अहमिह प्रतिपद्-रेखा
क्षुधायाः प्रथमभूमिका

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विच्छिन्नकिंशुकः

त्वदुष्णलोतकं यदा
मन्नयनं संक्रमते
तदैव त्वं दूरायसे
आवेगं संस्कृत्य
वेगमथितपथप्रान्ते
अहं तु विच्छिन्नकिंशुकः....
देहतो न धौतो रंगः
मनसि न स्नेहभङ्गः
आत्मनाऽहम् अङ्करङ्कः
गोधूलिशशाङ्कः
प्रतीक्षायां त्वमेव च
प्रथमदिनाङ्कः ।

न गन्ध आसीत्
न वा बन्धो वर्त्तेऽधुना
स्मरणे तापत्राणः
अतीतस्य समीरणः
मर्मरेण वचस्प्राणः
पुराणोऽयमाशारणः ।
वृष्टिः स्यादथवा
तापो भवेत्—
नाऽहम् अनुरागी
सद्यो हि च्युतशेषो
नाशप्रतियोगी ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाविकः

निष्ठुरनिःश्वासतले
निजस्वं तरङ्गीकरोति
वानप्रस्थो सूर्यः
दिशाजीर्णदेहे
प्रत्यूषं तु शीतमावहति
पुरातनचूल्लिकायां
धूमः कमनीयः ।

नौरस्ति नदी च वर्त्तते
व्यवहितं नाविकस्य नाम
कोलाहलो नाना—
प्रस्तुतेः परिणतिरिह
सुरतपरक्षणे
यथैका विरागचेतना ।
वलयः सरलः—
परं दैनन्दीनीमतिक्रान्तुम्
अब्दस्य वा आयुः कुतः ?

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिरंसा

कस्मिन्नेकपार्वत्यजनपदे
कुमुदस्य ग्लानिं जडीकृत्य
दीपस्तवकेषु
रात्रिः पल्वलायते
अस्पष्टस्य आमन्त्रणे
उद्दीप्यते उत्तेजना
मोहविकीरणं संकलयति
विवेकशून्यता
व्यवहारसीमांतः
अश्लीलता संज्ञामाहरति ।

क्व संभोगः तपसा सिद्ध्यति
क्व वा संयमेन रतिः
पुण्यफलायते ?
रेलमार्गे आत्मघातकस्य
शेषनिमीलनमिव
अवक्षयस्य आवाहनें
शक्तिश्चपलायते
तथापि दिगम्बरस्य
अभियानें मम
केवला यायावरी
जीवनरिरंसा ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यस्तमण्डलम्

पायं पायं निजरक्तम्
अहं तु जीवामि
चलितुमेकाको
अग्निसात्कर्त्तुं
पुनश्च निजस्वम्
विक्षुब्धसागरस्य
प्रदुष्टलंघनमिव
शून्यता क्लिश्नाति
मद्व्यस्तमण्डलम् ।

मनो द्रुह्यति मन्थने
जीवनस्य आकुञ्चने
आत्मा विलपति ।
दौर्भाग्यं फलयति
अधिकारः .. ....
कर्मचित्रं नियमो बध्नाति
अनुरोधतरुतल्पे
नीतिरोधो विपुलायते
निश्चये न प्रतिभाति
प्रस्थानसरणिः .... ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परागः

अलसकर्मचारिणः सुखजल्पे
व्यत्येति कार्यालयकालः
अविचारो घोरायते
प्रार्थिनः प्रतीक्षानैराश्ये ।
भिक्षुकस्य अभिलाषे
तथापि समीचीनो भवति
यः कोऽपि दिवसः
भ्रमणाय अवशिष्टद्वारे ।
दूरायते.....
तालतरुच्छाया,

तमसा कज्जलायते
उन्मीलनस्तरे
विकृता भवति
प्रकाशस्य व्याप्तिः ।
तथापि प्रणवस्य
अनुवृत्तिस्वनें
प्रसूनस्य.... ....
मृदुच्युतिमपेक्षते
पूजकस्य स्पर्शः
प्रदीपो ज्वलति
परागसन्धानें ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतिपथिकः

अहं नागरिकः
अहं च संस्कृतिपथिकः
यो गतो निकटे मे
न तस्य संकेतः
सम्मुखे स एव
अस्तव्यस्तपथः .... ।
हस्ते न यष्टिका
न वा प्रदीपिका
दृष्टिपाते न तारका
न वा काचिन् मनस्विनी राका ।

जानेनाऽहं पदक्षेपो मम
किमुद्दिश्य कमतिक्राम्यति—
न मानसे निद्रा, न वा जागरणम्
न शीतस्य कातरता
न वसन्तस्नेहसम्मेनलम्
चरणपातस्य भूमिविनिश्चये
अन्धायते केवलगमनम् ।
अतीते नतोन्नता घटनामालिका
वर्त्तमाने भग्नरुग्णस्वप्नस्य पेटिका
भाविभावे परिधिपरिखा
निरुत्प्रेक्ष्या सीमाप्रहेलिका ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रात्रिरेका तमसातटिनी
दिवसस्तु साक्षात् मार्गचलः
व्यतिकर प्रतीकारतल्पे
जलायते कालः,
करप्रसारणमात्रम्....,
स एव निषिडायते....
जड़ायते.... अवलीढायते....
नेपथ्यस्य शवं वहन्
अहं तु चलामि
नामायितुमनिर्वचनीयम्
स्वपयितुं संस्कारजलेषु
शरतू शयनीयम्....
गङ्गे च यमुने चैव !
सरस्वति ! गोदावरि !
देहि वारि....
देहि वारि...
महावृक्षं विगिलति
हिंसाविषधरी...
हे, ऋतावरि... !
हे, वेदस्य माधुरि !
देहि वारि...
देहि वारि.....

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुच्चारितम्

व्याहरणमात्रमिह
मिथ्यायते कथा
अनुच्चारितामभिव्यक्तिम्
कवलीकरोति
स्खलनस्य भीतिः
आरतीतो रतिः विगलति ।
प्रियाया रुग्णस्वप्ने
सुन्दरस्य सीमा दरिद्राति
निवेदने कलङ्को जृम्भते
अश्रु अर्घ्यायते
चिन्तालहरीषु ।

कर्मविस्मरणेऽपि कदाचित्
अतीततो मुक्तिर्न मिलति ।
शिशुपुत्रं पतनतो वारणाय
मातुश्चकितधावनमिव
समयः त्वरते
उद्धर्तुं वर्त्तमानसंज्ञाम्
तथापि प्रतिध्वनिः
अतीतमभ्येति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

झङ्कारो झरति जलदतः
मर्मरायितुं निर्झरस्य स्वरे
निश्वासः पीड्यते
कामनाया ज्वरे
काकलिः जीर्यते
निषिद्धकोटरे—।
वृक्षतले छाया निजात्मिका
अनुद्भूतमावच्छाति
आनन्दस्य अभिधानलाक्षा

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नयननिदाघः

को वा लाभो जिज्ञासायां
पर्वतस्य जनकविषये
को वा लाभः परिप्रश्ने
कथं नाम 'उपत्यका' इति
कस्याश्चित् समतलभूमेः ?
पादपः त्यजति पर्णानि
क्षणशः क्षणशः.....
वाक्यबन्धः शब्दान् यथा
कणशः.... कणशः....
संप्रति तु तर्जनीतो

निर्देशः स्खलति
इङ्गितं न अर्थमालिङ्गति,
दृश्यं निवर्त्तते दृष्टिदेहलीतः
ऋतुः विवर्त्तते
स्वप्नसीमाचले
यदि च वर्षणनिमित्तम्
अनुकूलः सकलः समयः
यद्यपि नयनपरिधिः
अश्रुसमाकुलः
तथापि परितः
तापो न शीतलः ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्रभूः

पादरेखाचूर्णितधारे
शीतर्त्तुः त्वरते
राजपथे.... ....
निद्रितजनस्य
संकुचिततनूपरि
नीहारिकायते
हास्यविलापयोः विशुद्धसन्दर्भः।
परस्परविलोकने
विवर्धते सहसा असूया,
अधरस्य संकीर्णविकासे
विगलति कृत्रिमदिवसः।

पुष्पस्य कवरीं स्पृशन्
महावृक्ष उल्लग्नो भवति
तथापि न दृश्यते
वसन्तस्य प्रारम्भिको विधिः।
किन्तु.... ....
को वा बोधयितुं प्रभवति—
आकाशोऽयमियान् दूरवर्त्ती
शून्यतासीमातः,
वृक्षादस्मात् कदाचित्
पर्णं न पतितम्
अस्माद् वा नयनात्
कदाचिदश्रु न झरितम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र तु वहति--

पूर्वपरलिपिशून्यः.... केवलपवनः
अयमेव सम्मर्देऽस्मिन्
सांप्रतिकमनः.... ।
को वा लाभोऽधुना
कस्य मुखविलोकनें
ज्योतिरग्रे अव्यक्तमधुरम्
तदेव आश्लेषशिखरम् ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिवासः

कुसुमानि निपतन्ति
पूजापात्रे.... ....
आस्वादयितुं प्रतिमाचरणतः
संगतेः सन्दर्भम्
तानि पुर्वानिवर्त्तन्ते
अदृश्यं संस्पृश्य
प्रियाकवरीतः.... .... ।
ततः अस्पृश्यानि
मुखे ग्लानिः
देहे म्लानिः

अधिवासे... ...
आदिमस्य प्रतिध्वनिः ।
धान्यवादस्तदनु सर्वशः
प्रत्येति शिलालेखमेकम्
यत्र वर्णा नितरां धूसराः
यदर्थं दूरता तमः संस्पृशति
जन्मजीवनयोः सहभावस्तत्र
रचयति यज्ञवेदीम्
अपीतस्तनयोः ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचनम्

व्यवहारपरिमाणमिह
केवलं वचनम्
इदमेव निर्गच्छति मुखात्
अस्मान् दूरयति
नग्नीकृत्य निकटयति च
जालिकस्य जालमिव
उपकूलयति ।
लेखनीतो निर्गच्छति किंचित्
न्यूनीकर्त्तुं मनोभावं क्वचित्
किंचिदपि विलोमीभवति

प्रियतमनामसंकीर्त्तने
स्वरूपनिरूपणे पुनः
अवशिष्टमुच्छिष्टायते ।
किंचिद् विस्मर्यते
मार्गातिक्रमणे
किंचिन् निर्लीयते
आलापावसरे
किंचिदपि विस्मर्यते
सद्यः साक्षात्कारे
अवशिष्टमव्यक्तं तिष्ठति
विस्मर्त्तुं समयप्रवाहे

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनपायिनी

अद्यतनपरिक्रमाद्वारे
परिशिष्टायते श्वस्तनसंकेतः
आलिमनलाञ्छनेषु
सद्यो भवति पुनश्चतुष्पथः ।
आयुरङ्के तु जीवनं याचते
योगवियोगयोः
फलसंकलनम्
प्रतीक्षासंस्कारेऽपि
रात्रिर्न प्रभातुमीहते

उन्मीलनपूर्वक्षणे
शय्या शून्यायते ।
प्रियास्नेहनिश्वासेषु
अवश्यं न प्रत्यायाति
प्रथमः स उदात्तप्रहरः
प्रतीकं तु समायाति किंचित्
अनुदात्तवयः संस्करणे
स्पर्शयितुमस्पष्टदूरताम्
यत्र मम अभिधेयसत्ता
अनूढा अनपायिनी ।

—※—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिपदी

(१)

दूर्वा जल्पति पवनेन सह
आत्मानमन्विष्य
त्वं तु निमज्जसि त्वदीयसौरभे
कुसुमानि यथा स्वकीयमधुनि ।

(२)

स्रोतसः स्वरूपे अन्तःसारा
यथा लहरीप्राणता
मद्-वहने तथैव ते
नव्यनिरीहता
अद्भुतैका नीरवसत्ता ।

(३)

कृष्णस्य वचने यथा
प्रस्फुटति अर्जुनस्य आत्मा
अस्मिता मे तद्वद् विभाति
तवाऽस्मिन् कर्मण्यमण्डने ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वभूमिः

वृक्षो विवर्धते, सत्यम्....
छेदनकारिणामपि
करो विकम्पते
ईर्ष्याजड़मन इव
मत्प्रतिवेशिनः..... ।
वासनासंवेगतले
प्रसारयन् त्यजति प्रणयः
पुलकितपूर्वभूमिः
सन्ध्यासमश्नुते
मिलनस्य वाञ्छितसोपानं ।
अभिमानमिव प्रियाया आकस्मिकम्
नाम आमायते—
तापरागो विवर्त्यते
कपोतस्य कण्ठे.... ।
नूतनप्रेमिणः अविश्वास इव
दृष्टिः मन्दायते—
सकलमपि प्रतिबिम्बम्
एकाकारायते ।
क्वचिदपि स्पन्दयति
पूर्वभूमेः.... ....
अबोध्यनिक्वणम्
पुनस्तदीयं क्रमानुरणनम्
अहेतुकहास्यमिव
मदीयसन्ततेः— ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिथिलसमष्टिः

सूर्यास्तं बिम्बते
गिरिजनललनायाः
तैलाक्तकपोले,
मुमूर्षुं भिक्षुणीनयने
ज्योतिर्भस्मायते,
मक्षिका न तथापि त्यजति
विधुरं तदीयमधरम्
अभावो लम्बते
पिपासुगुञ्जने ।

ग्रन्थिः विमुच्यते
शिथिलसमष्टेः
ततः सर्वं पृथक् पृथक्,
नाम निवर्त्तते समाहर्त्तुं
आनन्दस्य परिणतरूपम्,
क्षीरस्यति पुनरपि
जननीवसनशेषांशः ।
अप्राकट्यनिवेदनें
मध्यायते....
पुष्पहासे केवलः पवनः
अरुन्धती विरुणद्धि
आत्मनः प्रतीतिम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वेषणे छाया दीर्घायते

दाहः संघटते

प्रत्येकस्पन्दने

नाङ्कं स्खलति चन्द्रमाः

आवेदनें... पुनरावेदनें

शून्यमुखे मौनायते

अलसनिश्वासः

व्यवधानं निजायते

संपत् संजायते ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आविलम्

पुरातनपत्रेषु
पिशुनिता दुर्बलशब्दाली
नूतनसमयेऽस्मिन्
दुर्बोध्या भवति ।
न स्मृतिरुषस्यति
न वा दृष्टिः स्पष्टयति
परिचितबिन्दूनां प्रथमनिबन्धम्
असन्तोषे मनः सीमन्तितम् ।
च्युतिसूचीपत्रे संप्रति
चन्द्रो न तरुणः
अस्तरागः पुनश्च करुणः ।

संध्या बन्ध्यायते—
कुक्कुराणां कलहेषु
क्षुधा वृद्धायते ।
सूर्यस्य ग्रीवायां दोलायते
तमसायाः स्थाली
स्रोतस्विनीस्यूते
उत्पूर्णो भवति
कल्पक्लिन्नधूलिः ।
ऋजायते अवकाशः—
अहमिकामुष्णयति तृषा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मार्गः प्रलम्बते
दिशा च आविला भवति
तदनु न तृषा ऋजूयति
नाहमिका वर्धनं त्यजति
विधिनिषेधयोः तत्त्वविनिमये
शान्तिरुदम्यति
साक्षादभिमुखे
अनहं गहनायते
आनन्दतिलके ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यक्तिः

प्रसूनस्य विधौतलपनें
सद्यो भवति
प्रणवस्य रमणीयस्वाहा ।
मध्याह्नवर्षणस्य दीर्घश्वासो
वाष्पीभवति मृद्गन्धे
तापः प्रविशति
रजनीजठरे ।
अप्रकटकेलिमञ्चे
आकृतिः विकृता भवति
सत्यं यथा रीतिं वितनुते
द्वारं विमृच्यते — नर्त्तकीमैथुनमुद्रायाम् ।
व्यक्ती भवति व्यक्तिः
सीमायितदुःखस्य वलये ।
आनन्दस्य धारा निःसरति
अवरोधबन्धपरिकल्पे.
बन्धश्च अमृतायते
अन्धिननयनें
पवनो निवर्त्तते
रुद्धकपाटतः.... .... ।
व्यक्तभावं विस्मरति व्यक्तिः
मुक्तवातायनें
न केवलः पवन आयाति
प्रकाशोऽपि
प्रविशति शश्वत् ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुलकप्रस्थः

याचकस्य सन्तुष्टप्रस्थाने
लक्ष्यायते यथा
पुनरन्वेषणम्
तथैव सद्यो भवति
प्रातरभिप्रायः— ।
स्वार्थो वर्षति दु.खा न
अभावः स्पर्धते
गृहोपकरणे,
धावनतादात्म्ये
सत्यायते.... ....
मत्कर्मसारांशः ।

तपोवने भ्रश्यति प्रणवः
मुनीनां जीविकासन्धाने
भस्मायते होमवैश्वानरः
प्रदूषणं पावनायते ।
पुलकस्य सरलार्थे
जीवनं तु समीक्षते
अव्यक्तं किमपि
उदात्तमञ्जुलम्
बुदबुदस्य सूचीपत्रे यदा
अनन्तः अञ्चलायते
सागरपुलिने.... ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मौनप्रकरणम्

तन्द्राया माधुरीं चिन्वन्
मार्गो विलिखति
अधिकारस्य टिप्पणीम्,
ओष्ठस्य कम्पनमादृत्य
वक्रयष्टिमायुराहिण्डते
ग्रहणकवलतो
विषयः स्खलति
विधवासैनिकवधूशृङ्गारतो
यथा वीरत्वसारांशः ।
तथापि न आशा
निमील्यते
ईश्वरस्य स्वरश्च श्रूयते
ज्वलद्जीवनगुल्मतः
अर्थधारे तु
निर्झरस्य मातृभाषा यथा
त्वमेव भाससे
रवनिवहस्य मम
मौनप्रकरणे ... ... ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिव्यक्तम्

जीवनमरणयोरन्धबन्धे
वैशाखधूसरमिह
अस्मत्-शब्दस्य
कायिकतादात्म्यम्
पत्रप्रेमिणोरबोध्यसंपर्कं
तदेव व्याप्तिमातनोति
निर्मलताप इव
पौषस्य प्रान्तरे
तथापि नात्मानं
ध्वजयितुं प्रभवति
साधीयसे.... ...
प्रत्ययस्य पोताश्रयः कश्चित् ।

गुरुत्वसमीक्षायां
निःसहायमातुः
वृत्तिहीनपुत्र इव
प्रतिष्ठते दिवसस्य
वियुक्तभग्नांशः ।
पृष्ठबन्धे तु संकेतायते
अनुपाख्यं किंचित्
यदलीकमभिसारयति
आत्मनः ...
अनुरञ्जनाय—
साक्षादभिव्यञ्जनाय ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संगमः

अभिसारपुरतो मे
अप्रसन्नं प्रतीयते
अन्तिमनक्षत्रम्,
सत्यस्य
स्पन्दनमुद्धृत्य
विभाति शिशिरस्य
अवकीर्णबिन्दुः ।

नवीकुरु ....
पुनर्नवीकुरु ....
अथवा संस्कुरु
सकलेन्द्रियाणि
अदृश्यमवगाहयितुं
शरदः संगमपयसि ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यात्रा

गमनसमापनस्वरसमन्वये
नाविको यात्रामारभते
व्याकुलकाकलिषु
दिवस आयाति
रजनीनूपुरमन्विष्य
अतीतं शीतलीकरोति
समतलदृश्यानां प्रसरः
अदृश्यं तु मसीस्नातम्
अभूतलक्ष्यपरिकल्पे।
छायायते अहमिका—
मेघस्य परागं वहन्
पुनः सकृत् स्पृशति सहसा
दूर्वायाः कवरीम्, अस्तंगमतापः।
स्पर्धा विवर्धते—
हास्यं तु न समाप्यते धरणीनेत्रतः।
छायया सह स्पर्धा नाम
न छाया निवर्त्तत न वा संघर्षस्य
अवसानं भवेत्, अनुभवे—
भयङ्करपराजयफलम्।
परमिह छायानिवारणम्....
यात्रायाः समापनचिह्नम्,
तदर्थं न केवलप्रकाशः
अपितु प्रकाशस्य मार्गनिरूपणम्
त्रिकालस्य निजस्वनिक्वणम्

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निमग्नः

निमग्नजनोऽहम्—
निमज्जने व्रणितोऽपि
करमहं प्रसारयितुं न शक्नोमि
निमज्जन्तं प्रति
ईर्ष्यया जातके मम हि
अवसितं स्नेहस्य जीवितम् ।
ममाऽण्डतो निःसरति शिशुः
नाऽहं वक्तुं प्रभवामि
पवनं कदाचित्
वाहयितुं सकृद् दूरदेशम्,

अहंकारः परिसरे हि मे
महीयासां प्रवेशो निषिद्धः ।
आतङ्कमात्मसात्कृत्य
अहं तु जीवामि मितवेतनवद्धो
निर्वागद्वारपाल इव
प्रवेशप्रस्थानयोः कृते
"नमः" अर्पयितुम् ।
त्वमिह निर्मीयसे
मदीयमृदुविषादतः—
मधुमान् आवयोः संपर्कः
निमग्नः कश्चित् दहनाऽभिषेकः
त्वच्चुम्बनसुलभावसरः
मत्परिचयस्य प्रहरः ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्यस्य साहित्यम्

शक्तिरुत्सहते व्याहर्त्तुं
मुक्तये स्वरूपम्
यात्रापथस्य बलात्कारे
चरणं तु
रुचिमस्वस्थीकरोति ।
विचारो न यथार्थं सहते
शस्यं विगलति
विहगचञ्चूतः
अभिधेये अभिलाषः
अपशब्दायते.... ।

तपनस्त्यजति छायाम्
दिवसस्य वसनग्रन्थिषु
आकाशस्य नीलमुखे
दुर्विपाकः कुज्झटिकायते
सत्यं निवर्त्तते
श्मशानप्रान्तरम्
मिथ्यायते
क्षणाय संसारः ।
जिजीविषाचतुष्पथे तु
अहमिकायते
स्वप्नमहाद्रुमः ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तटी

कियद् वा गणयिष्यन्ति
गमनागमनप्रविधिं
पादपास्ते स्थितिप्राणाः
सरणिचरणशरणाः ?
चिह्नेन चिह्नमत्र विधूयते
पर्याकुल व्यापृतिषु
संघटते स्मरणविलयः
स्वार्थान्धिकर्त्तव्यनाटके
विलोम्यते मम परिचयः ।
निजभारपरिमापनधिया
धावनं मे प्रवर्त्तते
परिसराद् भिन्नपरिसरम् ।

मकतूर्मं तु प्रतीयते साक्षात्
तन्द्रालुशिक्षकस्य
स्वाक्षरनिमित्तं
समुद्दिष्टं किंचिद्
बालचित्राङ्कनम् ।
वाणिज्यं प्रवाहो यत्र
जीवनं च जलशून्या नदी
तत्र वराक-नाविकस्य
का वा यज्ञवेदी..... ?
अत्र तु—
युगपद्धावननिमित्तं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्मीयन्ते सुप्रशस्ताः
मार्गाः सहस्रशः—
तथापि मां न जहाति
ममत्व विपुला
नाविकस्य कुटी
नात्मीयतां वा
क्लिश्नाति कदाचित्
प्रलुण्ठिता तटी ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरवर्त्ती

स्मृतितले तरुणायते
किंचिदभिनवम्
यदद्य जीर्णपथे
विकासपिशुनम्..... ।
स्तन्यपानरतशिशुर्यथा
मातुर्मुखमेव निरीक्षते
तथैव त्वामहं निरीक्षे
नारीकेलपादपस्य छाया यदा
विक्रीडति पल्वलसलिले,
यदा च धावति
धूमाभो जलदः
तारामभिलक्ष्य
विभ्रमकल्लोले ।
वृष्टिं रचयति स्वेदः—
मनस्तु बन्धनी काचित्
साक्षात् वन्दीशाला ।
लज्जालोतकयोः तमिस्रमिश्रणे
त्वामिह गिलति कल्पना
जालायते विपथविलासः
स्वरूपं ते समानं तथापि
केशविवर्धनें यथा
अनाहतं शरीरगौरवम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चैतन्यस्य विमग्नप्रतीके
जागर्त्ति पुनश्च प्रतीक्षा—
दूर्वायाः स्मरणे यथा
आषाढ़स्य कोमलप्रपातः.....
पञ्जरविहगयोः व्यवधाने
आकाशो वा
कियान् दूरवर्त्ती ?

—*—



CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुरभिसंकेतः

तृषाया अभिधानं
मोचयति वर्षा
मृत्तिकासुरभितः प्रकाशते
मयूरीचरणस्य
प्रीतिसांवेतिकी रङ्गायते—
अर्पणस्पन्दनस् ।
अङ्कलग्नसन्ततिविनोदः
स्मितायते —
पित्रोः दृष्टिविनिमये ।
वृद्धाया मनसि बिम्बते
बिन्दुपाततरङ्गपरिधिः
देहः शीतायते भारायते —
काकस्नातधूसरप्रहरः ।

संध्या विलुप्यते
प्राक्तनभेकगीतिकाम्
नर्त्तकी प्रत्यायाति
नर्त्तनं समाप्य
स्तन्यं दातुं पीड़ितशिशवे,
धारां प्रवहति
शोकस्य स्वाक्षरे नेत्रमस्ति.....
प्रकाशोऽपि विद्यते तत्रैव
अनुचितप्रतीक्षायाम्
अभिसारायते—
तथापि तमसा ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आषाढलाञ्छनम्

अन्नप्रतिश्रुतितले
दयानाम्ना क्वचिदपि
दासत्वं जृम्भते
उच्छिष्टमायुः संजायते।
आषाढ़स्य प्रवाह इव
वक्रतरायते.....
व्यवहृतेः परिभाषा क्वचित्।
कालस्य लाञ्छनं स्निह्यन्
अस्तमेति परं
क्षोभसिक्तः सूर्यः,
तमसाया मसृणकृन्तले
चित्रायते.....
क्षुधार्त्तचरितस्य
सम्मोहनप्रभा—
प्रतीयते तत्र मम प्रीतिः
यमुनायां साक्षात्
वसुदेवस्य—
निमज्जनस्थितिः।
मर्मपुटे तु
त्वमेव तादात्म्यं तनुषे
निजलेखविलसिता यथा
स्मारिका कदाचित्

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यूषगरलम्

समरोऽवगाहे
तारकाया प्रत्यूषगरले
कलिकाया अलसविषे
काकलिस्तु कोलाहलः
कुसुमचरिते भीतिः
पीतायते— ।
काकदम्पतीसांध्यस्नेह इव
नवस्तवे शान्तिः शब्दायते
प्राचीकुटीरे तु
अनिर्वचनीयः—

श्वस्तनस्य मोहः
ज्वालायते समयस्य जयः ।
न वा वर्षति पर्जन्यः
न यज्ञाद् वा अन्नं सम्भवति
सत्यं रुधिरायते
प्रस्थानचत्वरे
अरण्यविलापो गह्वरायते
अस्तशिखरे.....
धरा दूरायते धूसरद्रवातः ।
मार्गणां जनपदे
अहं निम्नगामी
अवरोहे वेगगुरुः
स्खलनभूमिकायां
विश्लथपथिकः ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दस्तु कृपणः

हृदयस्य रुग्णबिम्बे
मनश्चिह्नायते
विपर्यस्तपोतस्य
अवशेष इव... ..
बुभुक्षुसंघर्षो हि
प्रतिपदं विरुणति
आत्मीयतामिह ।

कर्त्तव्यतो दायित्वं स्खलति
निजनिर्भरशीलायाः
सतीत्वमिव..... ।
मन्नयने दृश्यानि भ्रश्यन्ति
रतिरुचिं शिथिलीकृत्य
आयुर्यथा विगलति
जरत्सीमन्तिनीशरीरतः ।
अनुभवनिरूपणे
शब्दस्तु कृपणः ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिच्छविः

शुभक्षणप्रत्याशया
विषादस्य वयो दीर्घायते
तथापि न हीयते सम्मर्दः ।
अस्तरागे विजृम्भते
संपर्कस्य मलिनमयूखः
अस्पष्टो न तथापि मर्दने
नटरंगलेपः ।
श्वासो न मे निरामयः
निभालनयूपबद्धः
चिन्ताबन्धो हि मे
बलवर्दस्कन्दस्य निबन्धः ।
सम्पत्तिश्च—
बुभुक्षुभिक्षुकस्य

भिक्षणीयप्रदेशविशेषः
यथा स प्रतिष्ठते
तत् स्थानं समर्प्य
अन्यस्मै भिक्षवे
यौतुकरूपेण
तथा मे प्रवृत्तिः ।
यात्राया वक्षसि
अतिक्रमणीयो नाम
छायायाः प्रकारः ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

 Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्धः

विद्धोऽहम्.....
बहिष्कर्त्तुं न शक्नोमि
तत्कण्टकम्
निष्कास्य वा निक्षेप्तुं
न प्रभवामि
कस्मिन्नपि पथि
अपथे वा.....
नूनं कश्चित् रक्ताक्तो
भवेदिति भिया
अपथे हि गच्छन्ति बहवः ।
निःसङ्गप्रकोष्ठस्य
अस्वस्थचत्वरे मम
तापः तपस्यति,
जीर्णवातायनेऽपि च
प्रविशति शश्वत्
समुद्रपवनः
न कम्पस्य उपशमो मम
न स्वेदः शीतलीभवति
कुसुमकेशरधारे मे पुरतः
श्मशानस्य गन्धः सूक्ष्मायते ।
चिन्ताऽवगुण्ठने तु
विभाति विहगः
जलद इव गगने यः
संलग्नो दृश्यते कदाचित्

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरपंक्तिः

पुरातनदर्पणे प्रतिबिम्बमुद्धरति
नूतनलपनम्
स्वस्थीभवति पुनरहमिका
दृश्यान्तरे दृष्टिस्तु धूसरा—
मातुरधरतः कम्पं समाकृष्य
अर्पयितुं स्थूलवस्त्रे तस्याः
विहरति शीतर्त्तुशुभेच्छा,
कच्छपचरणतः पुनः समायाति
जरापरिपाटी तमो विसर्पति
कुटीदीपतले कीटो नटायते—

लोभस्तु प्राक्तनः
पानपात्रस्य अन्तिमबिन्दैवें.... ।
नव्यपुराणयोः स्पन्दः संयुज्यते
स्वपन्ति नक्षत्राणि
शिशिरबिन्दुषु
नश्वरस्य आलस्यं दृश्यते
बालक्रीड़नके
मनसि तु संलग्नो भवति
पंक्तिमितवर्णराजियंथा
व्यथाया वेंपथुः
अवधानं तथापि मथ्नाति
काचिदपरा पर्याप्तिः

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिपाकः

पूर्णदेयधिया
अहं तु ददामि सकलम्
परं संलग्नतया
शेषायते किंचित्
अहमिकातले
दर्वीधारे यथा
परिवेषणीयस्य
क्षरणसारांशः।
स्तोकमपि तदेव दहति
कुटुम्बस्य वयोलिपिषु
तदेव वहति
दृश्यान्तरं मम
अश्रुनिःश्वासयोः
दूरतायां
तदेव मे जीवनस्य सीमा।
सीमापरपारे तु
नक्षत्रायते.....
आकाशस्य नाभिः
दिग्वलयतादात्म्ये
परिपाकं प्रतीक्षते
तथापि मे
संलग्नावशेषः।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुपूर्वी

निकटे मे तटबद्धा
शुष्कनदीशय्या—
अहमिकाविमर्दिता
संघर्षस्य
काचिदितिकथ
क्रमाधोनतरङ्गपीड़िता ।
तथापि निवारणं
न सहते स्रोतः
असम्भवानुरञ्जने
पक्ष्मतो लोतकमिव

स्खलति मानसतो रंगः
अन्वेषणे प्रतीक्षा शाश्वती
मातुः प्रतीक्षायां यथा
सन्ततिमङ्गलम् ।
अनुपूर्वीसंयोजने
नयने मे
त्वमुपपद्यसे
मृत्तिकाबीजयोः
अन्योन्यकैवल्ये ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिश्रलिपिः

विकसनस्य स्थायित्वसन्धाने
दिवा दावायते—
रसिकस्य शेषचिन्ता
क्लान्तिमाद्रियते।
अपरिचितपवने लुप्यते
प्रतीक्षितस्वरस्य संकेतः
गुञ्जनस्य माधुरी नश्यति,
नूपुरस्य स्खलननिमित्तं
पादः कृशायते।
भयनिमीलने
निद्रा वा आयास्यति कुतः ?

चकितचटकस्य
मध्याह्नतन्द्रायां
स्वरूपयति मामिह केवलं
दृश्यादृश्ययोः मिश्रलिपिः कश्चित्
सान्त्वयति कण्टकप्रसंगः—
न कण्टकसर्वं पीड़यति पादम्
न सर्वयन्त्रणा
कण्टकसम्भूता
कण्टकं तिष्ठतु तत्र
पादपातो यत्नेन कर्त्तव्यः।
अवधानें तु—
आकाशे नगायते मेघः
दिग्वलये नगो मेघायते।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभक्तवेदी

ऋतुमन्दिरे पुष्पायते वेदी
अवगुण्ठनतले
अनवधेयं मे पीयूषयति
फाल्गुनय मिनो
प्रीतिबिन्दु पुष्णाति जीवनम् ।
अदृश्यमपि निजायते पुनः
ग्रामीणवात्सल्ये यथा
वृक्षः पुत्रायते ।
वक्रस्मितेन तु विभज्यते मध्यभूमिः
आवृत्तगीतिकायाः स्वरोऽपह्नियते
पुरातनीभवति गर्भस्थमूर्छना
अभिमानें केवलीभवति
युगलयन्त्रणा,

समरः संघटते —
कुक्कुरजृम्भायां शब्दश्चण्डायते
दूरीभावमात्मनि विलिप्य
अस्तमेति रक्ताक्ततपनः
बिन्दुः विकीर्यते—
मधुपात्रतो निःसरति रसः ।
पौरुषं न्यासायते
नर्त्तकस्य परिच्छदे मम
प्रियाया मलिनमुखमिव
प्रतिभाति दिग्भागो मेदुरः ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपराह्णमाया

अग्रे चक्रवालशय्या
सागरस्य मधुचर्या
मन्नयने लीलाप्रणयिनी
तमसाया नीलवेणी,
दुष्टकीटदंशनमिव
मम रोमन्थनम्—
तदेव संगृह्णामि प्रतिक्षणम्
मत्स्यो यथा जलस्य उष्णताम् ।
लोतके झरति विरहकज्जलम्
अर्थमुद्रितवचनेषु

सत्यायते वियोगस्य स्वरः
कालमुखे पूतिमयः
मन्मांसकवलः
अवरुद्धः सरणिसकल. ।
नदी शुष्का.... ....
कूलमपि उपलविलोलम्
तथापि प्रवचने
त्वमेव प्रभातस्य छाया
प्रथमप्रणये संक्षिप्तविषया
इदानीं तु विरामनिमित्तम्
अपराह्णमाया ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पादटीका

विहङ्गमविष्ठाचित्रे
अभिशप्ता प्रतीयते
परित्यक्ता तटी....
साक्षादेका पादटीका
समरपीड़ितजीवनधारायाः ।
गैरिकगिरिपथे
तपस्विनः चरणचिह्नानि
प्रभवन्ति न सम्प्रति
शुक्तिमर्म सूचयितुमिह ।
पुस्तकप्रच्छदस्य शीर्षाक्षरमिव
मानवो हि अहमिकाजडः
अभिलाषस्य धूमाभप्रपाते
परपीड़ानीतिस्तस्य
निम्नतमसोपानस्य
निह्नुतपरिचितिरिव ।
स्वप्नातुरतृषातले
आत्मज्वालैव सद्गतिः ।
मनो विमृश्यते –
पुरतस्तु तुलसीवनस्य
विमुक्तकवरीषु पुण्यायते
सौरभस्य अस्तलिपिः
अनुभवे च स्वनायते
किमपि निजस्वम् ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहमिति

मुक्ता दृश्यते जीर्णा कुटी
शीर्णा पतति शून्या तटी
नाविको नास्ति....
नाविको नास्ति ...
कोलाहलतले
पुष्पायते 'नेति नेति'
परितोविह्वला निश्वसितिः—
नाविको नास्ति....
नाविको नास्ति....
स्रोतस्विनीधारे

निर्बोधबुद्बुदः परिचरति ।
शिथिला दूयते क्षेपणी
रिक्ता पूयते तरणिः
नाविको नास्ति....
नाविको नास्ति....
श्वस्तनेऽपि निवर्त्तने
नास्ति काचिन्निश्चितिः ।
प्रवाहपीठे दृश्यराशिः
रौप्यरागे विक्षिपति
'अहमिति अहमिति'—
दुग्धधवलज्योतिः ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिकरणम्

तव निष्क्रमणे
प्रतीयते—
त्वया सह सर्वं मे विगतम् ।
समागमे पुनरनुभवः
मम किंचिन्निजस्वमतिष्ठत्
त्वत्परित्यक्तपरिसरे ।

हिमीभूतमनस्तन्त्रे
कलुषीभवति
विलम्बस्य संज्ञा
सोपानं प्राकारायते
अवधाने.....
आविष्कारायते
निजाधिकरणम् ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सद्गतिः

अहमग्रेसर.....
निदिद्रासुवर्त्तमानमिव
अतीतस्य स्कन्धे भविष्यमुद्वहन्,
परित्यक्तकूपो यथा
अनुभवो मम
विशृङ्खलनीतिक्लान्ता गतिः
अस्पष्टप्रतिवादे पुनः
स्वार्थक्षयभयम्
याच्ञाजड़प्रणिपाते
मनो व्रणमयम्.....।

पुरतो मे—
एकाकिनी नक्षत्रस्य द्युतिः
आकलनसीमायां च व्याधिवार्धक्ययोः
साहचर्यमिव परिणामायते
भूमिभूमिष्ठयोः काचित् परिचितिः।
तथापि प्रतीक्षायाम्
ऋतुरिव नायाति विषादः,
परमहं यत्नशीलः
गर्भतो मे बलात् समाकृष्य
जनयितुमक्षुण्णमक्षयम्
प्रवर्त्तने दुःखमङ्गीकर्त्तुम्
तावता सद्गतिः—
दुःखं हि मातृत्वस्य
प्रथमसम्पत्तिः।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तगीतिः

जीर्णमन्दिरसन्धितः
अङ्कुरिता भवति कदाचित्
द्रुमस्य आकाङ्क्षा
दीनगृहिणीस्वप्ने साक्षात्
प्रासादप्रतीक्षा.... .... ।
जीवनधारणस्य
सूत्रानुगुणने किन्तु
शब्दगर्भे अर्थो यथा
शान्तिर्निह्नूयते
प्रार्थनातो विगलति
कुलीनसंकेतः, सौजन्येऽपि
याच्ञास्रोतस्विनी ।
तथापि न दृश्यते
करद्वयस्य मिलनप्रविधिः ।
अहमिका प्राकारायते
विरला हि ... .
स्वाज्ञानज्ञानिनः ।
अतएव अतीतस्य
पादचिह्ने ....
वृष्टिः सर्वा तमसावाहिका ।
तथापि सैव भावसान्द्रा
पुलकरसिका.... ....
भाले तस्याः सौदामिनीटीका
निरपेक्षा.... ....
वर्षणवृत्तस्य गीतिका ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिनादः

आकृतिकृत्योर्व्यवधाने
नवीना भवति
स्थितिचित्रस्य अपरप्रक्रिया
प्राचीनप्रत्यये च
प्रतीकं रचयति
व्यसनस्य क्षुधा
नावसानमपि सूचयति
जरन्मार्गशीर्षम् ।
निर्जीविकतरुणस्य
शीतलशोकेषु
रक्तस्नानं कामयते
पुनश्च धरणी—
कुतो वा संगतिः ?

सहस्रसंशयतले
विकलो दृश्यते प्रतीक्षिततिथिः ।
विपणीषु विपरिवर्त्तते
सामग्रीणां सूची
ताण्डवस्य क्व वा उपरतिः ?
समयदर्पणे—
जीवनमिहगणयति
व्यवकलनस्य नष्टप्रतिकृतिम्
अदृश्यं तु तथापि यजते
प्रणवस्य स्वनसंक्रमणम्

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोमन्थः

ज्वलतु वा
निर्वापितो भवतु प्रदीपः
समानमुभयम्
मूल्यहीना हि
भविता तैलिनी
एकाक्षितो यदि वहेदश्रु

अपरतो नूनं बहिष्यति
एतदर्थमिह शान्तिमयम्
अभिनवं
किंचिन्मनोगतम्
पुनश्च छिदुरकण्ठे मे
त्रिकालसंगतेः संगीतम् ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यजनम्

मत्सन्ततिव्यथातले
प्रियायाश्च विषादकवले
त्वामहं प्रतिबिम्बयामि
आत्मनो दर्पणे, कस्यचिदातङ्कस्य
आवर्त्ते निमज्ज्य,
मन्नयने रहस्यं तनोति
व्यथाविषादयोः अभिसारः कश्चित्
शिशुपादे नर्त्तनमभ्यस्य
तिथितल्पे
विकसनमारभते पद्मम्
तथापि न सूच्यते
उदयसंकेतः,
कीटस्य निर्बोधभ्रमिषु
परिक्रमा यथा पूर्वं
तथा च साम्प्रतम्।
परिणामः स्पष्ट इह
निखिलकर्मणाम्....।
मत्प्रवर्त्तनं तु—
अनुभवसंग्रहसंज्ञया
उत्साहस्य सूची,
अतएव विश्वासो जन्यते
चेतनायाः चित्रपुस्तिकातः
प्रार्थना मे नूनं त्वयि
संगतिं रचयेत्
त्वत्संगतिरवाप्येत
वस्तुनः सकलसीमासु।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विप्रहरः

दूरायते द्विप्रहरः
निदाघस्य स्वेदं गालयितुं
हेमन्तस्य प्रत्यूषकुसुमे
स्मृतिसिक्तवर्त्तमाने
तुलसीव पुण्यायते
सन्तानवत्सलायाः
मामकीनी मुद्रा—
तरणीतरङ्गयोः प्रस्थविनिमये
देहतो वयो विगलति
भाषाया व्याकरणमिव

प्रतीक्षाया नामान्तरे
अवहेला अन्तरङ्गायते
मातुर्मुखं निर्लीयते
दूरताया यामलकपाटे ।
स्वप्नसूचीपत्रे विभासते
उर्वरशपथः
मालाकारनयने यथा
कुसुमवृत्तान्तः ।
न दृश्यते परं
वंशवदपथः—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पल्वलजले तथैव विधुरो भवति
बिम्बनिवहः
विधवामातुः लोतकदर्पणे यथा
इन्द्रियाणां विषयपर्यायः
अयमेव परिचयः
उपलब्धेरयं च प्रचयः

राधाया यन्त्रणातले
चपलायते यमुनायाः पयः ।
स्खलति द्विप्रहरः....
सत्यं यथा अन्वेषणचिह्ने
हृदयं तु विहरति—
अपरविपिने ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

साक्षात्कारः

नयनाग्रे शाखायते यूपः
दासत्वप्रार्थनायां
वध्यभूमिः पुनर्नवायते
स्थविरायते
आशासिक्तः कश्चिदभिनयः
प्रत्याशिनो मम।
आश्लेषस्य उत्प्रेक्षया
सद्यो भूषा मलिनायते।
साक्षात्कारः समाप्यते
जीविकायाः कृते—
कर्म प्रारभ्यते

अनिष्टसाधनस्य
निविष्टकटाक्षे.... ।
उच्छिष्टस्य अङ्गीकारे
जीवनं तु कृतकृत्यमिह
पराधीनो निजपरिचयः ।
मनो हि संगृह्णाति
क्षुधायाः चिह्नानि
नगरवीथीषु यथा
मालिन्यमाहरन्ति
उच्छिष्टलिप्ता
मार्गजबालकाः ।

1461
तिथि
पु०सं० 251
भारती पुस्तकालय

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आहरणमर्यादायां
सेवा विरम्यते
तथापि न समाप्यते
जलेषु तरङ्गः ।
साक्षात्काराय
मर्मरायते
"त्राहि"—सम्बोधनम्
सर्वत्र सम्बोध्यस्तु
एकः प्रतीयते ।

—*—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

1461
भारती पुस्तकालय

कवेः कृतयः

१.	प्रणयप्रदीपम्	(काव्यम्)
२.	हृदयेश्वरी	(कवितासंग्रहः)
३.	महातीर्थम्	,,
४.	भिन्नपुलिनम्	,,
५.	अलका	,,
६.	ईशा	,,
७.	शीतलतृष्णा	(उपन्यासः)
८.	प्रतिपद्	,,
९.	निकषा	,,
१०.	अरुणा	,,
११.	अञ्जलिः	,,
१२.	आवर्त्तम्	,,
१३.	ऋतम्	,,
१४.	मधुयानम्	,,
१५.	तिलोत्तमा	,,
१६.	शिखा	,,
१७.	विसर्गः	,,
१८.	शशिरेखा	,,
१९.	ॐ शान्तिः	,,
२०.	निम्नपृथिवी	(लघुकथासंग्रहः)
२१.	दिशाविदिशा	,,
२२.	पताका	(बालोपन्यासः)
२३.	महान्	(बालकथासंग्रहः)
२४.	एकदा	,,

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Research Publications :

25. Reference : A Logico-Linguistic Identification.
26. Relations in Knowledge Representation.
27. Elements of Research Methodology in Sanskrit.
28. Social Justice and its Ancient Indian Base.
29. Logic of Non-Case-Relationship.
30. Logic of Knowledge-Base.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान
तिथी.....
पु०सं०.....
भारती पुस्तकालय
T461/3

CC-0.Panini Kanya Maha Vidyalaya Collection.

gitized by Arya Samaj Foundation Chennai and eGango

CC-0.Panini Kanya Maha Vidyalaya Collection.